# .. pramANa lakShaNa (mAdhava) ..

# ॥ પ્રમાણ લક્ષણ (માધવ) ॥

## Document Information

Text title : pramANa laxaNa (mAdhava)

File name : pramANa_laxaNa.itx

Category : vedanta

Location : doc_yoga

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shrisha Rao shrao at dvaita.org

Proofread by : Shrisha Rao shrao at dvaita.org

Latest update : November 1, 2010

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ પ્રમાણ લક્ષણ (માધવ) ॥

॥ શ્રી ગુરુભ્યો નમઃ હરિઃ ૐ ॥

અશેષગુરુમીશેશં નારાયણમનામયમ્ ।
સમ્પ્રણમ્ય પ્રવક્ષ્યામિ પ્રમાણાનાં સ્વલક્ષણમ્ ॥ ॥

યથાર્થં પ્રમાણમ્ । ।
તદ્વિવિધમ્ । કેવલમનુપ્રમાણં ચ । ।
યથાર્થજ્ઞાનં કેવલમ્ । ।
તત્સાધનમનુપ્રમાણમ્ । ।
કેવલં ચતુર્વિધમ્ । ઈશલક્ષ્મીયોગ્યોગિભેદેન । ।
પૂર્વદ્વયમનાદિનિત્યમ્ । ।
સ્વાતંત્રપારતંત્રાભ્યાં તદ્વિશેષઃ । પૂર્વં
સ્વપરગતાખિલવિશેષ વિષયમ્ । દ્વિતીયં
ઈશેઽન્યેભ્યોઽધિકમ્ । ।
અસાર્વત્રિકમ્ । અન્યત્ર સર્વવિષયમ્ । સ્પષ્ટત્વે ભેદઃ । ।
યોગિજ્ઞાનં ઋજૂનામનાદિનિત્યમ્ । ઈશે જીવેભ્યોઽધિકમ્ ।
અન્યત્રાલોચને સર્વવિશયમ્ । ક્રમેણ વર્ધમાનમ્ ।
આમુક્તેઃ । તતોઽવ્યયમ્ । ।
તતોઽર્વાક્ક્રમેણ હ્રસિતમ્ । સાદિ ચ તાત્ત્વિકેભ્યોઽન્યત્ર । ।
અયોગિજ્ઞાનં ઉત્પત્તિવિનાશવત્ । અલ્પમ્ । ।
અનુપ્રમાણં ત્રિવિધમ્ । પ્રતક્ષમનુમાનમાગમં ઇતિ । ।
નિર્દોષાર્થેન્દ્રિયસન્નિકર્ષઃ પ્રત્યક્ષમ્ ।
નિર્દોષોપપત્તિરનુમાનમ્ । નિર્દોષઃ શબ્દઃ આગમઃ । ।
અર્થાપત્ત્યુપમે અનુમા વિશેષઃ । ।
અભાવોઽનુમાપ્રત્યક્ષં ચ । ।
પરામર્શાપરામર્શવિશેષાત્ । ।
સંભવપરિશેષાનુમા । ।
આત્માન્યોન્યાશ્રય ચક્રકાનવસ્થાકલ્પનાગૌરવ
શ્રુતદૃષ્ટહાનાદયોદૂષણાનુમા । ।
ઉપક્રમોપસંહાર તદૈકરૂપાભ્યાસાપૂર્વતાફલાર્થવાદાશ્ચ । ।
ઉપપત્તિવિશેષાઃ । ।
ત એવ સોપપત્તયો લિઙ્ગાનિ । ।
સમાખ્યા વાક્યપ્રકરણસ્થાનાનિ ચ । લિઙ્ગવિશેષાઃ । ।
વ્યાપ્તિરુપપપત્તિમૂલમ્ । ।

સા પ્રતિજ્ઞાહેતુદૃષ્ટાંતરૂપા । ।
હેતુગર્ભા પ્રતિજ્ઞા કેવલાઽપિ । ।
સિદ્ધૌ પ્રતિજ્ઞાયાં હેતુમાત્રં ચ । ।
દૃષ્ટાંતઃ સ પ્રતિજ્ઞો હેતુગર્ભઃ । ।
ઉપપત્તિદોષૌ વિરોધાસઙ્ગતિ । ।
ન્યૂનાધિકે વાચનિકે । ।
સંવાદાનુક્તિયુતાસ્તુ એવ નિગ્રહાઃ । ।
પ્રત્યક્ષં સપ્તવિધમ્ । સાક્ષિ ષડિન્દ્રિયભેદેન । ।
માનસ પ્રત્યક્ષજા સ્મૃતિઃ । ।
સ્મૃત્યનુવાદયોર્નાપ્રામાણ્યમ્ । ।
યથાર્થત્વાનુભવાત્ । ।
અહાનેશ્ચ । ।
વિરોધો માનસ્વવાક્યાભ્યામ્ । ।
સ્વવાક્યવિરોધોઽપસિદ્ધાંતજાતિરૂપેણ । ।
જાતિર્ન મેયે માનાપેક્ષેત્યાદિકા । ।
મેયે માનાપેક્ષાસ્તીતિ ચ તેનૈવ ન્યાયેન સિદ્ધત્વાત્ । ।
માનવિરોધશ્ચ । ।
છલમસઙ્ગતિ । ।
અન્યચ્ચ । ।
અન્યચ્ચ । ।
ગૃષ્ટિવિવક્ષયા ગામાનયેત્યુક્તે પૃથિવી વિવક્ષયા
ગવાનયનમશક્યમિતિવત્ । ।
ત્રિવિધો વિરોધઃ । પ્રતિજ્ઞાહેતુદૃષ્ટાંતભેદેન । ।
પ્રમાણવિરુદ્ધાર્થપ્રતિજ્ઞા પ્રતિજ્ઞાવિરોધઃ । ।
હેતુસ્વરૂપાસિદ્ધિરવ્યાપ્તિશ્ચેતિ હેતુવિરોધઃ । ।
સાધ્યસ્ય સાધનસ્ય વાઽનનુગમો દૃષ્ટાંત વિરોધઃ । ।
પ્રતિજ્ઞાયાઃ સમબલવિરોધ એવ સપ્રતિસાધનઃ । ।
સ એવોપાધિ દોષોઽપિ । ।
સર્વ એતે દૃશ્યત્વાનુમાને દૃષ્ટવ્યાઃ । ।
પ્રત્યક્ષાગમાદિભિર્જગતઃ સત્યત્વાત્ । ।
તત્પક્ષે દૃશ્યત્વસ્ય ચ મિથ્યાત્વાત્ । ।
અનિર્વચનીયસ્ય પ્રતિવાદિનોઽસિદ્ધત્વાત્ । ।
અનિર્વચનીયસ્યેતિ । ।
આત્મનોઽપિ દૃશ્યત્વાત્ । ।

શુક્તિરજતાદેરનિર્વચનીયત્વાભાવાત્ । ।
અનિર્વચનીય દૃશ્યત્વાભાવાત્ । ।
માનસિદ્ધત્વાદિતિ સપ્રતિસાધનત્વાત્ । ।
જગત્સત્યત્વગ્રાહિ પ્રત્યક્ષસ્ય વર્તમાનમાત્રગ્રાહિત્વે
અનુમાનાગમપ્રામાણ્ય ગ્રાહિણોऽપિ પ્રત્યક્ષત્વાવિશેષાદુત્તરક્ષણે
પ્રામાણ્યં ન સેત્સ્યતીતિ ભેદાદિવાક્યાનામેવ પ્રામાણ્યં સ્યાત્ । ।
તસ્ય સાક્ષિસિદ્ધત્વં ચેજ્જગત્સત્યત્વમપિ સાક્ષિસિદ્ધમ્ । ।
વ્યભિચારિશ્ચેદાગમાર્થાનુમાનિર્દોષત્વાધ્યવસાયે ચ સમઃ । ।
અત ઉત્તરદિવસેऽભેદવાક્યસ્ય ભેદોऽર્થઃ સ્યાત્ । ।
નિર્દોષાનુમાયાઃ સદોષત્વમ્ । ।
સદોષાનુમાયાઃ નિર્દોષત્વમ્ । ।
ઇત્યવ્યવસ્થા । ।
આશ્રયસાધ્યવધિકરણાસિદ્ધયો ન દૂષણમ્ । ।
અતિપ્રસઙ્ગાભાવાત્ । ।
અતિપ્રસઙ્ગેન હિ દોષત્વાદોષત્વે કલ્પ્યે । ।
વ્યાપ્તિરેવ હિ પ્રયોજિકા । ।
અસત્યપિ વ્યાપ્તિરસ્ત્યેવ । ।
અસદાશ્રયસ્ય સાધકત્વં નેત્યપિ વ્યાપ્તિં વિના
કથં નિવાર્યતે । ।
અસદાશ્રયમિત્યાદિ વિશેષણત્વસંભવે કથમવ્યાપ્તિઃ । ।
ન ચાત્યંતાભાવોऽપિ સર્વધર્મરહિતઃ । પ્રમેયત્વાદ્યનુભવાત્ । ।
પરિશેષાર્થાપત્તિપ્રામાણ્યાભ્યુપગમાચ્ચ । ।
વિમતં સકર્તૃકમિત્યત્ર સર્વજ્ઞત્વસ્ય પક્ષધર્મતા બલેન
સિદ્ધ્યઙ્ગીકારાત્ । ।
પરિશેષોऽર્થાપત્તિરનુમાનમિત્યવિશેષઃ । ઉપપત્તિમાત્રત્વાત્ । ।
ઉપપત્તેશ્ચ વ્યાપ્ત્યપેક્ષા સર્વથાઙ્ગીકાર્યેત્યાગ્રહ માત્રેણ ભેદઃ । ।
ઉપમાનસ્યાપિ વ્યાપ્તિરૂપત્વાત્ । ।
ન હિ સ્વસદૃશેનાસદૃશં ક્વચિદ્દૃષ્ટમ્ । ।
યોગ્યાનુપલબ્ધેશ્ચ લિઙ્ગત્વમ્ । ।
અવિશેષાત્ । ।
અવિશેષાત્ । ।
અવિશેષાત્ । ।
અવિશેષાત્ । ।
ઉક્તદોષેષ્વેવાશેષાનુમાનદોષાણામંતર્ભાવઃ । ।

સાધ્યાવિશિષ્ટોઽસિદ્ધિઃ । ।
સિદ્ધસાધકોઽસઙ્ગતિઃ । ।
ન પ્રમાસાધનં પ્રમાણમ્ । ।
જ્ઞાનવ્યતિરિક્તપ્રમાયાં પ્રમાણાભાવાત્ । ।
ન ચાજ્ઞાતપરિચ્છિત્તિરેવ પ્રમેત્યત્ર કિઞ્ચિન્માનમ્ । ।
યાથાર્થ્યમેવ પ્રામાણ્યમિત્યઙ્ગીકારાત્ । ।
ન ચાનુભૂતિરેવ પ્રમાણમ્ । સ્મૃત્યાદાવવ્યાપ્તેઃ । ।
વેદાનુમાનાદિ પ્રામાણ્યપ્રસિદ્ધેશ્ચ । ।
સ્મૃતિઃ પ્રત્યક્ષમૈતિહ્યમનુમાનશ્ચતુષ્ટયમ્ ।
પ્રમાણમિતિ વિજ્ઞેયં ધર્માદ્યર્થે બુભૂષુભિઃ ॥

ઇતિ શ્રુતેશ્ચ । ।
ઐતિહ્યમાગમભેદઃ । ।
ન ચ સમ્યગનુભવસાધનં પ્રમાણમ્ । ઈશ્વરજ્ઞાનાદાવવ્યપ્તેઃ । ।
અપ્રામાણ્યે પ્રમાણાભાવચ્ચ । ।
પ્રામાણ્યજ્ઞાને ચ । ।
તત્રાપ્યઙ્ગીકારેઽનવસ્થિતેઃ । ।
સ્વપ્રકાશાત્માઙ્ગીકારે તત્રાવ્યાપ્તેઃ । ।
સ્મૃતેશ્ચ પ્રામાણ્યાનઙ્ગીકારેઽનુભૂતં મયેત્યત્ર પ્રમાણાભાવાત્ । ।
લિઙ્ગત્વેન પ્રામાણ્યે કલ્પનાગૌરવમ્ । ।
દૃષ્ટહાનિશ્ચ । ।
સ્મૃતિપ્રમાણદ્વૈવિધ્યમાત્રકલ્પને મિથ્યાજ્ઞાનાદેર્નિરાસાદનુભવ
વિરોધઃ । ।
તદનુભવાભાવ ઇત્યુક્તેઽનુભવઃ સ્મૃતિશ્ચ નાસ્તીત્યુક્તે
કિમુત્તરમ્ । ।
સ્વસિદ્ધેઃ સાધનં પરસિદ્ધેર્દૂષણમ્ । ।
અતો ન દૂષણે અપસિદ્ધાંતાદિ । ।
ઇષ્ટાપત્તિઃ સિદ્ધસાધનત્વાદસઙ્ગતમેવ । ।
આનંદતીર્થમુનિના બ્રહ્મતર્કોક્તમાર્ગતઃ ।
માનલક્ષણમિત્યુક્તં સઙ્ક્ષેપાદ્બ્રહ્મસિદ્ધયે ॥ ॥

અશેષમાનમેયૈક સાક્ષિણેઽક્ષયમૂર્તયે ।
અજેશ પુરુહૂતેડ્ય નમો નારાયણાય તે ॥ ॥

ઇતિ શ્રીમદાનંદતીર્થભગવત્પાદાચાર્યવિરચિતં
પ્રમાણલક્ષનગ્રન્થોત્તમં સમ્પૂર્ણમ્
॥ ભારતીરમણમુખ્યપ્રાણાંતર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ॥

Encoded and proofread by Shrisha Rao shrao at dvaita.org

.. pramANa lakShaNa (mAdhava) ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*